## शेषो बहुव्रीहिः। (२३/८२९)

उपयुक्तादन्यः[1] शेषः। [2]शेषः समासो बहुव्रीहिसञ्ज्ञो भवति। कश्च शेषः? यत्रान्यः समासो नोक्तः। वक्ष्यति 'अनेकमन्यपदार्थे' (२.२.२४/८३०) – चित्रगुः। शबलगुः। कृष्णोत्तरासङ्गः। शेषः इति किम्? उन्मत्तगङ्गम्। [3]लोहितगङ्गम् (२.१.२१/६७५)। बहुव्रीहिप्रदेशाः — 'न बहुव्रीहौ' (१.१.२९/२२२) इत्येवमादयः॥

## अनेकमन्यपदार्थे (२४/८३०)

अनेकं [4]सुबन्तमन्यपदार्थे वर्तमानं [5]सुपा सह समस्यते, बहुव्रीहिश्च समासो भवति। प्रथमार्थमेकं[6] वर्जयित्वा [7]सर्वेषु विभक्त्यर्थेषु बहुव्रीहिर्भवति। प्राप्तमुदकं यं ग्रामं प्राप्तोदको ग्रामः। ऊढरथोऽनड्वान्। उपहृतपशू रुद्रः। उद्धृतौदना स्थाली। चित्रगुर्देवदत्तः। वीरपुरुषको ग्रामः। प्रथमार्थे तु न भवति। वृष्टे देवे गतः। अनेकग्रहणं किम्? बहूनामपि यथा स्यात्,

सुसूक्ष्मजटकेशेन [8]सुगजाजिनवाससा।
[9]समन्तशितिरन्ध्रेण द्वयोर्वृत्तौ न सिध्यति॥ (म.भा.१.४२२)

[९७] बहुव्रीहिः [10]समानाधिकरणानामिति वक्तव्यम्। (म.भा.१.४२३)

व्यधिकरणानां मा भूत्, पञ्चभिर्भुक्तमस्य।

[९८] अव्ययानां च [11]बहुव्रीहिर्वक्तव्यः। (म.भा.१.४२३)

उच्चैर्मुखः। नीचैर्मुखः।

[९९] सप्तम्युपमान[12]पूर्वपदस्योत्तरपदलोपश्च [13]वक्तव्यः। (म.भा.१.४२३)

कण्ठे स्थितः कालोऽस्य [14]कण्ठेकालः। उरसिलोमा[15]। [16]उष्ट्रस्य मुखमिव मुखं यस्य स उष्ट्रमुखः। खरमुखः (म. भा. १. ४२३)।

[१००] [17]समुदायविकारषष्ठ्याश्च [18]बहुव्रीहिरुत्तरपद[19]लोपश्चेति वक्तव्यम्। (म. भा. १. ४२५)

[20]केशानां सङ्घातः केशसङ्घातः, केशसङ्घातः चूडाऽस्य केशचूडः। [21]सुवर्णस्य विकारोऽलङ्कारोऽस्य [22]सुवर्णालङ्कारः।

---

1. यः स इत्यधिकम् फ. 2. शेषसमासः क, समासः नास्ति फ. ह. 3. नास्ति ब. क. ड. फ. 4. समर्थं फ. 5. सुपा सह विभाषा क. 6. एकं नास्ति फ. ह. 7. सर्वविभ° फ.ह. 8. सुनताजिन (म. भा. 1. 420) इ. फ, सुलभाजिनवाससा बा. शा. पृ. 111, सुप्ताजा° ब. 9. पुत्री पर्वतराजस्य कुतो हेतोर्विवाहिता बा. शा. पृ. 111, नास्ति ब. फ. ह. 10. समानाधिकरणानां वक्तव्यः इ. 11. बहुव्रीहिर्वक्तव्यः नास्ति क. ड. इ. फ. ह. 12. °पूर्वस्योत्तर° ड. फ. 13. वक्तव्यः नास्ति इ. फ. 14. स इत्यधिकम् फ. 15. उरसिसूत्रः, उदरेमणिः इत्यधिकम् ड. फ. 16. उष्ट्रमुखमिव फ, उष्ट्रस्य मुखं अस्य ड. 17. समुदाये विकारे च क. 18. बहुव्रीहेः इ. 19. °लोपो वक्तव्यः ड.इ.फ. 20. केशसमाहारः चूडाऽस्य इ, केशानां समूहः केशसमूहः, केशसमूहः चूडा अस्य फ, केशानां समाहारः चूडा अस्य ब. क, केशानां समाहारात् ड. 21. सुवर्णविकारो क. ह, सुवर्णो विकारः अस्य इ, स्वर्णरूपस्य फ. 22. स स्वर्णालंकारः फ.